Subject- Sanskrit (2nd SEM Programme)

Course code- APSNS 201C-1B

Course Title- Sanskrit Poetry and Metre.

Course Topic- Raghuvaṃśam(Canto-1)

**ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्य्ययः।**

**गुणा गुणानुवन्धित्वात्तस्य सप्रसवा इव।।22।।**

कालिदासेन विरचितं रघुवंशं महाकाव्यस्य प्रथमसर्गात् गृहीतोऽयं श्लोकः।

राजादिलीपस्य गुणवर्णनाकाले श्लोकोऽयं कविना वर्णितम् ।

ज्ञाने मौनं शक्तौ क्षमा त्यागे श्लाघाविपर्य्ययः, तस्य गुणाः गुणानुवन्धित्वात् सप्रसवा इव।

परस्परविरुद्धानामपि गुणानां तत्र साहचर्य्यमासीदित्याह ज्ञान इति, ज्ञाने परावृत्तान्तज्ञाने सत्यपि मौनं वाङ्नियमनं, यथाह कामकन्दकः - "नान्योपतापि वचनं मौनव्रत चरितेष्णुते"ति शक्तौ प्रतीकारसमर्थ्येऽपि क्षमा अपकारसहनम्। अत्र चाणक्यः - " शक्तानां भूषणं क्षमेति"। त्याग वितरणे सत्यपि श्लाघाया विकथनस्य विपर्ययः अभावः। अत्राह मनुः- "न दत्त्वा परिकीर्तयेतृ" इति। इत्थं तस्य गुणा ज्ञानादयः गुणैर्विरुद्धैर्मौनादिभिः अनुवन्धित्वात् सहचारित्वात् सह प्रसवो जन्म येषां ते सप्रसवाः सोदरा इव अभूवन्, विरुद्धा अपि गुणास्तस्मिन् अविरोधेनैव स्थिता इत्यर्थः।

अत्र गुणः उपमेयपदम्। सप्रसवत्वरूपगुणम् उपमानम्। अतः अत्र गुणोत्प्रेक्षा अलङ्कारः। अस्य लक्षणे विश्वनाथेनोक्तम् - "भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना।"